# संस्कृत-वार्ता:

दिनाङ्क : 14/01/2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- प्रधानमन्त्री नरेन्द्रमोदी अकथयत् यत् कृषकाः राष्ट्रनिर्माणे सशक्त-सहभागिनः सन्ति, तेषां प्रयासैः च आत्म-निर्भर-भारताभियानं सशक्तं भवति।
- रक्षामन्त्री राजनाथसिंहः अवदत् यत् पूर्वसैनिकाः राष्ट्रिय-चैतन्यस्य जीवन्त-स्तम्भाः सामूहिक-साहस्य च प्रतीकत्वेन वर्तन्ते।
- भारत-देशेन ईरानदेशे स्थिताः स्वीयाः नागरिका: संसूचिता: यत् ते वणिज्यिक-विमानानाम् अन्येषाञ्चोपलब्ध परिवहन-साधनानाम् उपयोगं कृत्वा यथाकथञ्चित् ईरानदेशं परित्यजेयु:।
- थाईलैंड्-देशे अद्य प्रातः गच्छति रेलयाने निर्माणकार्ये संलग्नस्य क्रेन इत्यस्य पतनेन नवविंशतिः जनाः मृताः, पञ्चषष्टिः जनाश्च व्रणिताः।
- भारत-न्यूजीलैण्ड-दलयोर्मध्ये जायमानायाः एकदिवसीय-क्रीकेट्-प्रतिस्पर्धा-मालिकायाः द्वितीया-स्पर्धा अद्य राजकोटस्य निरंजनशाह-क्रीडाङ्गणे जायते।

-------------------------------------------

<u>प्रधानमंत्री नरेन्द्र मोदी</u>

प्रधानमन्त्री नरेन्द्रमोदी अकथयत् यत् कृषकाः राष्ट्रनिर्माणे सशक्तसहभागिनः सन्ति, तेषां प्रयासैः च आत्मनिर्भरभारताभियानं सशक्तं भवति। श्रीमोदी उक्तवान् यत् केन्द्रसर्वकारः कृषकाणां सशक्तिकरणाय प्रतिबद्धो वर्तते, अथ च एतदर्थम् अजस्रं प्रयासं कुरुते। श्रीमोदी अद्य सूचना-प्रसारण-राज्य-मन्त्रिणः डॉ.एल.मुरुगनस्य आवासे आयोजिते पोंगलसमारोहे अकथयत् यत् पोंगलपर्व जीवन्ततमिल-संस्कृतेः प्रकृत्या सह च तस्य युक्ततायाः उत्सवः अस्ति।

प्रधानमन्त्री मोदी अकथयत् यत् पोंगल-उत्सवः प्रकृत्या परिवारेण समाजेन च सह संतुलन-स्थापनस्य मार्गं प्रशस्तीकरोति। श्रीमोदी अकथयत् यत् पोंगल इति पर्व सम्प्रति वैश्विकपर्वत्वेन

संजातम्, अथ च इदं कृषकैः कृतस्य श्रमस्य सम्मानं संसूचयति। श्रीमोदी उक्तवान् यत् इदं पर्व पृथिवीं सूर्यं च प्रति कृतज्ञताभिव्यक्तेः अवसरः अस्ति। सम्प्रति देशस्य अन्येषु क्षेत्रेषु विद्यमानाः जनाः अपि लोहडी-मकरसंक्रान्ति-माघबिहू-पोंगलसदृशानाम् उत्सवानां हर्षोल्लासे निमग्नाः दृश्यन्ते। एते उत्सवाः एकभारतं श्रेष्ठभारतम् इत्यस्य भावनां दृढीकुर्वन्ति।

प्रधानमन्त्री मोदी कथितवान् यत् पोगंलोत्सवः जनान् प्रेरयति निर्दिशति च यत् जनाः प्रकृतिं प्रति कृतज्ञभावं सदैव जीवनशैल्यामेव सम्मेलयेयुः । श्रीमोदी उक्तवान् यत् प्राकृतिक-संसाधनानां संरक्षण-दायित्वं जनतायाः दायित्वम् अस्ति। प्रधानमन्त्रिणा इदमपि कथितं यत् भविष्यति काले मृदायाः गुणवत्ता सुरक्षिता स्यात् अपि च जलसंरक्षणस्य संसाधनानाञ्च समुचितोपयोगः स्यादिति वर्तमानकालिकी आवश्यकता वर्तते। श्रीमोदिना कथितं यत् मिशल-लाइफ इत्यस्य अन्तर्गतं एकः वृक्षः मातुः नाम्नः स्यात् अथ च अमृतसरोवरः इत्येतादृशाः उपक्रमाः ऐक्यभावनां वर्धयन्ति।

प्रधानमन्त्री मोदी अवदत् यत् तमिल-संस्कृतिः समग्रे देशे मानवतायाः सामूहिक-न्यासत्वेन वर्तते। तमिलसंस्कृतौ कृषकाः जीवनस्य आधारत्वेन मन्यन्ते। तमिलसंस्कृतिः विश्वस्य प्राचीनतम-सभ्यतासु संस्कृतीषु च अग्रगण्या वर्तते अपि च इयं संस्कृतिः नैकाः शताब्दीः परस्परं संयोजयति, इतिहासात् शिक्षते अथ च वर्तमानं भविष्यत्कालं प्रति नयति। श्रीमोदिना इदमपि कथितं यत् तमिलसंस्कृतेः प्रेरितं भूत्वा भारतं स्ववंशानुक्रमेण रिक्थेन च शक्तिं प्राप्नोति, अपि च नवीनाः सम्भावनाः प्रति च प्रशस्तीकरोति।

------------------------------------------

<u>प्रधानमन्त्री नरेन्द्रमोदी- मकरसंक्रान्ति</u>

प्रधानमन्त्री नरेन्द्रमोदी मकरसंक्रान्तेः उत्तरायणस्य माघबिहू इत्यस्य च अवसरे देशवासिभ्यः हार्दिक्यः शुभकामनाः प्रदत्तवान्। संचारतन्त्रमाध्यमेन प्रदत्ते सन्देशे प्रधानमन्त्रिणा आशा अभिव्यक्ता यत् मकरसंक्रान्तेः अयं पवित्रोत्सवः सर्वेषां जीवनं सुख-शान्ति-स्वास्थ्य-समृद्धि-पूर्णं च करिष्यति। श्रीमोदिना कथितं यत् माघबिहू इत्युत्सवः नवसस्यस्य समृद्धेः ऐक्यस्य च उत्सवः अस्ति। प्रधानमन्त्री अकामयत् यत् कृतज्ञतायाः सद्भावस्य च भावनया देशः निरन्तरं समुज्ज्वलः समृद्धियुक्तश्च भविष्यति।

--------------------------------------------

## मकरसंक्रान्तिपर्व -

आदेशम् अद्य मकरसंक्रान्तेः पर्व सोल्लासं सोत्साहं च आमान्यते। मकरसंक्रान्तिः शैत्यकालस्य समाप्तेः दीर्घदिनानाञ्च आरम्भस्य प्रतीकत्वेन वर्तते। देशस्य विभिन्नभागेषु अयम् उत्सवः पृथक् पृथक् नामभिः समुदीर्यते। तत्र हि तमिलनाडुमध्ये अयम् उत्सवः पोङ्गलः इति नाम्ना, गुजरप्रान्ते उत्तरायणम् असमराज्ये च भोगाली-बिहू पेण पश्चिमबङ्गप्रान्ते च अयं हि उत्सवः पौषसंक्रान्तिः इति नाम्ना ख्यायते।

--------------------------------------------

## रक्षा मंत्री राजनाथ सिंह

रक्षामन्त्री राजनाथसिंहः अवदत् यत् पूर्वसैनिकाः राष्ट्रिय-चैतन्यस्य जीवन्तस्तम्भाः सामूहिक-साहस्य च प्रतीकाः आगामि-वंशानुक्रमस्य च कृते प्रेरणास्रोतोभूताः सन्ति। सशस्त्रबल-पूर्व-सैनिक-दिवस-अवसरे अद्य नवदेहल्यां श्रीसिंहः अवदत् यत् पूर्वसैनिकाः राष्ट्र-निर्माणस्य च प्रत्येकं अवसरे योगदानं यच्छन्ति, अनेन सहैव अनुशासन-नेतृत्व-साहस-सदृशैः गुणैः समाजस्य मार्गदर्शनं कुर्वन्ति। रक्षामन्त्रिणा इदमपि कथितं य त् पूर्वसैनिकानां गणवेशस्य वर्णः कार्यस्थलं च कामं परिवर्तेत पुनरपि तेषु देशभक्तिः सेवाभावना च सदैव तथैव भवति।

श्रीसिंहः पूर्वसैनिकान् साग्रहं निवेदितवान् यत् ते स्वीयानुभवानां माध्यमेन युवजनानां मार्गदर्शनं कुर्युः, अपि च अग्निवीरेभ्यः युवसैनिकेभ्यश्च च समुचितदिशाः प्रदद्युः। अन्ते च रक्षामन्त्री पूर्वसैनिकान् उद्दिश्य इदमपि अकथयत् यत् आवश्यकतायां सत्यां ते आपात-परिस्थितौ नागरिकप्रशासनसहयोगार्थं सदैव सन्नद्धाः भवेयुः।

--------------------------------------------

## विदेशमन्त्रालयाः- ईरान परामर्शः

भारत-देशेन स्वनागरिका: सांसूचिता: यत् ते ईरानदेशात् वणिज्यिक-विमानैः अथवा उपलब्धानाम् अन्येषां परिवहन-साधनानाम् उपयोगं कृत्वा ईरानदेशं परित्यजेयु:। तेहरान-स्थितेन भारतीयदूतावासेन जनानां साहाय्यार्थं दूरभाषासङ्ख्या: अपि प्रकाशिता अस्ति सा च वर्तते – नव अष्ट नव एकम् द्वि अष्ट एकं शून्यं नव एकं एकं पञ्च इत्यनया सहाय्यार्थं दूरभाषं कर्तुं शक्नुवन्ति, अथ च दूतावासेन सह CONS.TWHRAN@MEA.GOV.IN इति अणुसङ्केतेनापि सम्पर्कं कर्तुं शक्नुवन्ति।

--------------------------------------------

**थाईलैंड्**

थाईलैंड्-देशे अद्य प्रातः संचाल्यमान-रेलयाने निर्माणकार्ये संलग्नस्य क्रेन इत्यस्य पतनेन नवविंशतिः जनाः मृताः, पञ्चषष्टिः जनाः च व्रणिताः। रेलयानं बैंकॉक-नगरात् उत्तरपूर्विक्षेत्रं प्रति गच्छति स्म, नखोन-राचसीमा-प्रान्तस्य सिखियो-जनपदे एषा घटना संजाता। दुर्घटनायाः समये नौकायां पञ्चनवत्यधिकमेकशतं यात्रिणः आसन्।

--------------------------------------------

**सेनाप्रमुखः – एन.सी.सी**

सेनाप्रमुखः उपेन्द्रद्विवेदी अद्य प्रोक्तवान् यत् आपरेशन-सिन्दूरम् इति देशस्य संकल्यस्य संयमस्य च किंचित् निर्णायकं प्रदर्शनम् आसीत्, येन च सशस्त्रबलानां नैतिकशक्तेः कुशलोत्कृष्टतायाः च प्रदर्शनम् अभवत्। सेनाप्रमुखः उपेन्द्रद्विवेदी नवदेहल्यां राष्ट्रिय-कैडेट-कोर-एन.सी.सी इत्यस्य गणतंत्रदिवस-पदसंचलन-शिविरं षडविंशत्यधिकद्विसहस्रं सम्बोधयन् तथ्यमिदं समुद्घाटितवान्।

--------------------------------------------

**क्रिकेट्**

भारत-न्यूजीलैण्ड-दलयोर्मध्ये एकदिवसीय-क्रीकेट-शृंखलायाः द्वितीया स्पर्धा अद्य राजकोटस्य निरंजनशाह-क्रीडाङ्गणे क्रीड्यते। भारतीयदलेन आदौ क्रीडता सप्तक्रीडकाणां हानौ चतुरशीत्यधिकद्विशतं धावनाङ्काः समर्जिताः सन्ति, अवधेयं यत् भारतीयदलं पूर्वमपि एकं शून्यम् इत्यतःशृङ्खलायां अग्रे वर्तते।

।। इति वार्ताः ।।